M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 532

Title: Nyaya Sutras

Patra

532

न्यायसूत्र by गौतम

Nyāya Sutras	Title
Gautama	Author
	Editor
	Year, Vols.
	Publisher
532	Remarks

गौतमकृत न्यायसूत्रं

श्रीगणेशाय नमः ॥ अथ प्रयोजनाभिधेयप्रकरणं ॥ ॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टां
तसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञाना
न्निःश्रेयसाधिगमः ॥१॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरा
भावादपवर्गः ॥२॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥३॥ इंद्रियार्थसंनिकर्षोत्प १
न्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षं ॥४॥ तत्पूर्वकं त्रिविधमनुमानं पू
र्ववच्छेषवत्सामान्यतोदृष्टं च ॥५॥ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानं ॥६॥ आप्तोप
देशः शब्दः ॥७॥ स द्विविधो दृष्टादृष्टार्थत्वात् ॥८॥ आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्ति
दोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयं ॥९॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो
लिंगं ॥१०॥ चेष्टेंद्रियार्थाश्रयः शरीरं ॥११॥ घ्राणरसनचक्षुस्त्वक्श्रोत्राणींद्रियाणि भूतेभ्यः ॥१२॥

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥१३॥ गंधरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥१४॥
बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थांतरं ॥१५॥ युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगं ॥१६॥ प्रवृत्तिर्वाग्बुद्धिश
रीरारंभ इति ॥१७॥ प्रवर्तनालक्षणा दोषाः ॥१८॥ पुनरुत्पत्तिः प्रेत्यभावः ॥१९॥ प्रवृत्तिदोषजनितोर्थः
फलं ॥२०॥ बाधनालक्षणं दुःखं ॥२१॥ तदत्यंतविमोक्षोपवर्गः ॥२२॥ ॥ समानानेकधर्मोपपत्तेरु
पलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥२३॥ यमर्थमधिकृत्य प्रवर्तते तत्प्रयो
का जनं ॥२४॥ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टांतः ॥२५॥ ॥ तंत्राधिकरणाभ्युपगमसं
स्थितिः सिद्धांतः ॥२६॥ स चतुर्विधः ॥२७॥ ॥ सर्वतंत्रप्रतितंत्राधिकरणाभ्युपगमसंस्थित्यर्थांतर
भावात् ॥२८॥ सर्वतंत्राविरुद्धस्तंत्रेधिकृतोर्थः सर्वतंत्रसिद्धांतः ॥२९॥ समानतंत्रसिद्धः [illegible] परतंत्रा
सिद्धः प्रतितंत्रसिद्धांतः ॥३०॥ यत्सिद्धावन्यप्रकरणसिद्धिः सोधिकरणसिद्धांतः ॥३१॥ अपरीक्षिता

न्यायोत्तरांगप्र० ५ न्यायप्र० १ कथाप्र० ९ हेत्वाभासप्र० ८

गौतमप्रणीतन्यायसूत्रं

भ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धांतः॥३२॥ ॥प्रतिज्ञाहेतूदाहरणोपनयनिगमना
न्यवयवाः॥३३॥साध्यनिर्देशः प्रतिज्ञा।३४।उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः॥३५॥तथा वैधर्म्या
त्॥३६॥साध्यसाधर्म्यात्तद्धर्मभावी दृष्टांत उदाहरणं॥३७॥तद्विपर्ययाद्वा विपरीतं।३८।उदाह
रणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः।३९।हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निग
त मनं॥४०॥ ॥अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः॥४१।विमृश्य पक्षप्रतिप २
क्षाभ्यामर्थावधारणं निर्णयः।४२॥ ॥इति प्रथमाध्यायस्याद्यमाह्निकं॥ ॥प्रमाणतर्कसाध
नोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।४३।यथोक्तोपपन्नश्छ
लजातिनिग्रहस्थानसाधनोपालंभो जल्पः।४४।स प्रतिपक्षस्थापनाहीनो वितंडा॥४५॥ ॥सव्यभि
चारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः॥४६॥अनैकांतिकः सव्यभिचारः।४७।

प्राशक्ति

छलसामान्यलक्षणप्र० ७ छलप्र० १

सिद्धांतमभ्युपेत्य तद्विरोधी विरुद्धः।४८।यस्मात्प्रकरणचिंता स निर्णयार्थमपदिष्टः प्रकरणस
मः।४९॥साध्याविशिष्टः साध्यत्वात्साध्यसमः।५०॥कालात्ययापदिष्टः कालातीतः॥५१॥ ॥वचन
विघातोर्थविकल्पोपपत्त्या छलं।५२।तत्त्रिविधं वाक्छलं सामान्यछलमुपचारछलं च॥५३।अविशे
षाभिहितेर्थे वक्तुरभिप्रायादर्थांतरकल्पना वाक्छलं।५४।संभवतोर्थस्यातिसामान्ययोगादसं
भूतार्थकल्पना सामान्यछलं।५५।धर्मविकल्पनिर्देशेर्थसद्भावप्रतिषेध उपचारछलं।५६॥वाक्छ
लमेवोपचारछलं तदविशेषात्॥५७॥न तदर्थांतराभावात्।५८।अविशेषे वा किंचित्साधर्म्यादेकत्व
प्रसंगः॥५९॥ ॥साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः॥६०॥विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्था
नं।६१।तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वं।६२।प्रकरणानि ११॥ ॥इति प्रथमोध्यायः॥ ॥
समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः॥१॥विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च॥२॥

संशयलक्षणपरीक्षाप्र० २

प्रमाणपरीक्षाप्र०३

गौतमसूत्रं विप्रतिपत्तौ च संप्रतिपत्तेः ।३। अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ।४। तथात्यंतसंशयस्त
द्धर्मसातत्योपपत्तेः ।५। तथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यंतसंशयो वा ।६।
यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसंगः ।७। ।प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ।८। पूर्वं हि प्र
माणसिद्धौ नेंद्रियार्थसंनिकर्षात्प्रत्यक्षोत्पत्तिः ।९। पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।१०। यु
गपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनां ।११। उपलब्धिहेतोरुपलब्धिविषयस्य चा ३
र्थस्य पूर्वापरसहभावानियमाद्यथादर्शनं विभागवचनं ।१२। समाख्याहेतोस्त्रैकाल्ययोगात्तथाभू
ताः समाख्या ।१३। त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ।१४। सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपप
त्तिः ।१५। तत्प्रामाण्ये वा न सर्वप्रमाणप्रतिषेधः ।१६। त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्त
त्सिद्धिः ।१७। प्रमेया च तुलाप्रामाण्यवत् ।१८। प्रमाणतः सिद्धेः प्रमाणानां प्रमाणांतरसिद्धिप्रसंगः ।१९।

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत्प्रमेयसिद्धिः ।२०। न प्रदीपप्रकाशवत्तत्सिद्धेः ।२१। क्वचिन्निवृत्तिदर्शना
दनिवृत्तिदर्शनाच्च क्वचिदनेकांतः ।२२। उपहाराभ्यनुज्ञाद प्रतिषेधः ।२३। प्रत्यक्षलक्षणानुपपत्ति
रसमग्रवचनात् ।२४। नात्ममनसोः संनिकर्षाभावे प्रत्यक्षोत्पत्तिः ।२५। दिग्देशकालाकाशेष्वप्येवंप्र
संगः ।२६। ज्ञानलिंगत्वादात्मनो नानवरोधः ।२७। तदयौगपद्यलिंगत्वाच्च न मनसः ।२८। प्रत्यक्षनिमित्तत्वा
च्चेंद्रियार्थयोः संनिकर्षस्य स्वशब्देन वचनं ।२९। सुप्तव्यासक्तमनसां चेंद्रियार्थयोः संनिकर्षनिमित्तत्वात् ।३०।
तैश्चापदेशो ज्ञानविशेषाणां ।३१। व्याहतत्वादहेतुः ।३२। नार्थविशेषप्राधान्यात् ।३३। प्रत्यक्षमनु
मानमेकदेशग्रहणादुपलब्धेः ।३४। न प्रत्यक्षेण यावत्तावदप्युपलंभात् ।३५। न चैकदेशोपलब्धि
रवयविसद्भावात् ।३६। ।साध्यत्वादवयविनि संदेहः ।३७। सर्वाग्रहणमवयव्यसिद्धेः ।३८। धार
णाकर्षणोपपत्तेश्च ।३९। सेनावनवद्ग्रहणमिति चेन्नातींद्रियत्वादणूनां ।४०। ।रोधोपघातसादृश्ये

अनुमानपरीक्षाप्र०१

उपोद्घातिकमयविप्र०२

गौ० न्यासूत्रं

स्योव्यभिचारादनुमानमप्रमाणं।४१।नैकदेशत्राससादृश्येभ्योऽर्थांतरभावात्।४२।॥वर्त्तमा
नाभावःपततःपतितपतितव्यकालोपपत्तेः।४३।तयोरप्यभावोवर्त्तमानाभावेतदपेक्षत्वात्।४४॥
नातीतानागतयोरितरेतरापेक्षासिद्धिः।४५।वर्त्तमानाभावेसर्वाग्रहणंप्रत्यक्षानुपपत्तेः।४६।कृत
ताकर्त्तव्यतोपपत्तेस्तूभयथाग्रहणं।४७।॥अत्यंतप्रायैकदेशसाधर्म्यादुपमानासिद्धिः।४८॥प्र
सिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः।४९॥प्रत्यक्षेणप्रत्यक्षसिद्धेः।५०।नाप्रत्यक्षे ४
गवयेप्रमाणार्थमुपमानस्यपश्यामः।५१।तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः।५२।॥शा
ब्दोनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्।५३।उपलब्धेरद्विप्रवृत्तित्वात्।५४।संबंधाच्च।५५।आ
प्तोपदेशसामर्थ्याच्छब्दार्थसंप्रत्ययः।५६।पूरणप्रदाहपाटनानुपलब्धेश्चसंबंधाभावः।५७।शब्दा
र्थव्यवस्थानादप्रतिषेधः।५८।नसामयिकत्वाच्छब्दार्थसंप्रत्ययस्य।५९।जातिविशेषेचानियमात्।६०॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः।६१।नकर्मकर्तृसाधनवैगुण्यात्।६२।अभ्युपेत्यका
लभेदेदोषवचनात्।६३।अनुवादोपपत्तेश्च।६४।वाक्यविभागस्यचार्थग्रहणात्।६५।विध्यर्थ
वादानुवादवचनविनियोगात्।६६।विधिर्विधायकः।६७।स्तुतिर्निंदापरकृतिःपुराकल्पइत्यर्थ
वादः।६८।विधिविहितस्यानुवचनमनुवादः।६९।नानुवादपुनरुक्तयोर्विशेषःशब्दाभ्यासो
पपत्तेः।७०।शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः।७१।मंत्रायुर्वेदप्रामाण्यवच्चतत्प्रामा
ण्यमाप्तप्रामाण्यात्।७२।दृष्टप्रवृत्तसामान्याच्चानुमानं।७३॥ ॥इतिद्वितीयस्याद्यमाह्निकं॥
नचतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात्।७४।शब्दऐतिह्यानर्थांतरभावादनुमानेर्थापत्तिसं
भवाभावानर्थांतरभावाच्चाप्रतिषेधः।७५।अर्थापत्तिरप्रमाणमनैकांतिकत्वात्।७६।अनर्थापत्ता
वर्थापत्त्यभिमानात्।७७।प्रतिषेधाप्रामाण्यंचानैकांतिकत्वात्।७८।तत्प्रामाण्येवानर्थापत्त्यप्रामाण्यं।७९।

गौ०सू०२ नाभावप्रामाण्यं प्रमेयासिद्धेः।८०।लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः।८१।
असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः।८२।तत्सिद्धेरलक्षितेष्वहेतुः।८३।न लक्षणावस्थि
तापेक्षसिद्धेः।८४।प्रागुत्पत्तेरभावोपपत्तेश्च॥८५॥ ॥आदिमत्वादैन्द्रियकत्वात्कृतकवदु
पचाराच्च॥८६।न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च॥८७॥तत्वभाक्तयोर्ना ५
नात्वस्य विभागादव्यभिचारः।८८।संतानानुमानविशेषणात्।८९॥कारणद्रव्यस्य प्रदेशश
ब्देनाभिधानात्।९०।प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च।९१।तदनुपलब्धेरनुपलं
भादावरणोपपत्तिः।९२।अनुपलंभादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलंभात्।९३।
अनुपलंभात्मकत्वादनुपलब्धेरहेतुः।९४।अस्पर्शत्वात्।९५।न कर्मानित्यत्वात्।नाणुनित्यत्वा
त्।९६।संप्रदानात्।९७।तदंतरालानुपलब्धेरहेतुः॥९८॥अध्यापनादप्रतिषेधः।९९।उभयोः

भिन्नकारणयोश्च प्रयोगेऽप्रयोगोपपत्तिः।अविकारे चाविशेषः।प्रयुज्यमानाग्रहणाच्च।अविकारेष १

पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः॥१००॥अभ्यासात्।नान्यत्वेप्यभ्यासोपपत्तेः॥२॥अन्यद
२ न्यस्मादनन्यत्वादनन्यदित्यन्यताभावः।३।तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः।४।विनाशकारणा २
नुपलब्धेः।अश्रवणकारणानुपलब्धेः सतत श्रवणप्रसंगः।५।उपलभ्यमाने चानुपलब्धेरसत्वा
दनपदेशः।६।पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः।७॥विनाशकारणानुपलब्धेश्चाव
स्थाने तन्नित्यत्वप्रसंगः।८।अस्पर्शत्वादप्रतिषेधः।९।विभक्त्यन्तरोपपत्तेश्च समासे।१०॥ ॥अ
थ शब्दपरिमाणप्रकरणं॥ ॥विकारादेशोपदेशात्संशयः॥११॥प्रकृतिविवृद्धौ विकारविवृ
द्धेः।१२॥न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः।१३।द्विविधस्यापि हेतोरभावादसाधनं दृष्टां
तः।१४।नातुल्यप्रकृतीनां विकारविकल्पात्।१५।द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः।१६॥
न विकारधर्मानुपपत्तेः।१७॥विकारप्राप्तानामपुनरापत्तेः।१८।सुवर्णादीनां पुनरापत्तेरहेतुः॥१९॥
न शब्दान्वाख्यानलोपः।वर्णसमुदायविकारानुपपत्तिवच्च वर्णविकारानुपपत्तेः।२

गौ०सू०२ न तद्विकाराणां सुवर्णभावाव्यतिरेकात्।२०।वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः।२१।सा
मान्यवतो धर्मयोगो न सामान्यस्य।२२।नित्यत्वे विकारादनित्यत्वे चानवस्थानात्।२३।नित्यानामतीं
द्रियत्वात्तद्धर्मविकल्पाच्च विकाराणामप्रतिषेधः।२४।अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विका
रोपपत्तिः।२५।विकारधर्मित्वे नित्यत्वाभावात्कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः।२६।प्रकृत्यनिय ९
मात्।२७।अनियमे नियमान्नानियमः।२८।नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः।२९।
गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः।३०॥ ॥अथप
दार्थनिरूपणप्र०॥ ॥ते विभक्त्यन्ताः पदं।३१।व्यक्त्याकृतिजातिसंनिधावुपचारात्संशयः।३२॥
याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबंधानां व्यक्तावुपचाराद्व्यक्तिः।३३॥
न तदनवस्थानात्।३४।सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिप

त्येभ्यो ब्राह्मणमंचकटराजसक्तुचंदनगंगाशाटकान्नपुरुषेष्वतद्भावेपि तदुपचारः।३५।आ
कृतिस्तदपेक्षत्वात्सत्वव्यवस्थानसिद्धेः।३६।व्यक्त्याकृतियुक्तेप्यप्रसंगात्प्रोक्षणादीनां मृद्गवके
जातिः।३७।नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः।३८।व्यक्त्याकृतिजातयस्तु पदार्थः।३९।व्यक्ति
र्गुणविशेषाश्रयो मूर्तिः।४०।आकृतिर्जातिलिंगाख्या।४१।समानप्रसवात्मिका जातिः॥४२॥ ॥
इति गौतमप्रणीतन्यायसूत्रे द्वितीयोध्यायः॥ ॥दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्।१।न विषयव्य
वस्थानात्॥२॥संदिग्धत्वादहेतुः।तदव्यवस्थानादेवात्मसद्भावादप्रतिषेधः॥३॥ ॥अथशरीरव्य
तिरेकप्रकरणं॥ ॥शरीरदाहे पातकाभावात्॥४॥तदभावः सात्मकप्रदाहेपि तन्नित्यत्वात्॥५॥न
कार्याश्रयकर्तृवधात्॥६॥अथ प्रासंगिकचक्षुरद्वैतप्रकरणं॥ ॥सव्यदृष्टस्येतरेणाँज्ञानात्।७॥ प्रत्यभि ३
नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्।८।एकविनाशे द्वितीयाविनाशान्नैकत्वं।९।अवयव
व्य

विनाशेऽप्यवयव्युपलब्धेरहेतुः ।१०। दृष्टान्तविरोधादप्रतिषेधः ।११। इन्द्रियान्तरविकारात् ।१२।
न स्मृतेः स्मर्तव्यविषयत्वात् ।१३। तदात्मगुणसद्भावादप्रतिषेधः ।१४। अथ मनोव्यतिरेकप्र० ॥

नात्मप्रतिपत्तिहेतूनां मनसि संभवात् ।१५। ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रं ।१६। नि
यमश्च निरनुमानः ।१७। अथ नित्यताप्रकरणं ॥ पूर्वाभ्यस्तस्मृत्यनुबंधाज्जातस्य हर्षभय

शोकसंप्रतिपत्तेः ।१८। पद्मादिषु प्रबोधसंमीलनविकारवत्तद्विकारः ।१९। नोष्णशीतवर्षका
लनिमित्तत्वात्पंचात्मकविकाराणां ।२०। प्रेत्याहाराभ्यासकृतात्स्तन्याभिलाषात् ।२१। अयसोऽ
यस्कान्ताभिगमनवत्तदुपसर्पणं ।२२। नान्यत्र प्रवृत्त्यभावात् ।२३। वीतरागजन्मादर्शनात् ।२४।
सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ।२५। न संकल्पनिमित्तत्वाद्रागादीनां ।२६। अथ शरीरपरीक्षा
प्र० ॥ पार्थिवं गुणान्तरोपलब्धेः ।२७। पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ।२८। निश्वासोच्छ्वा

सोपलब्धेश्चातुर्भौतिकं ।२९। गंधक्लेदपाकव्यूहावकाशदानेभ्यः पांचभौतिकं ।३०। श्रुति
प्रामाण्याच्च ।३१। अथेन्द्रियभौतिकत्वपरीक्षाप्र० ॥ कृष्णसारे सत्युपलंभाद्व्यतिरिच्य चोप
लंभात्संशयः ।३२। महदणुग्रहणात् ।३३। रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणं ।३४। तदनुपल
ब्धेरहेतुः ।३५। नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ।३५। द्रव्यगुणकर्मभेदाच्चो
पलब्धिनियमः ।३६। कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतंत्रः ।३७। मध्यंदिनोल्काप्रकाशानु
पलब्धिवत्तदनुपलब्धिः ।३८। न रात्रावप्यनुपलब्धेः ।३९। बाह्यप्रकाशानुग्रहाद्विषयोपलब्धे
रनभिव्यक्तितोऽनुपलब्धिः ।४०। अभिव्यक्तौ चाभिभवात् ।४१। नक्तंचरनयनरश्मिदर्शनाच्च ।४२।
अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ।४३। कुड्यान्तरितानुपलब्धेरप्रतिषेधः ।४४।
अप्रतिघातात्सन्निकर्षोपपत्तिः ।४५। निःसरमसेः स्फटिकान्तरितेऽपि दाहेऽविघातात् ।४६। नेतरेतर

न्यायसूत्रं धर्मप्रसंगात्।४७। आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः॥४८। दृष्टानुमि
तानां हि नियोगप्रतिषेधादनुपपत्तिः।४९। अथेंद्रियनानात्वादवयविनानास्थानत्वाच्च संशयः।५०।
त्वगव्यतिरेकात्।५१। न त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः।५२। न युगपदर्थानुप
लब्धेः।५३। इंद्रियार्थपंचत्वात्।५४। न तदर्थबहुत्वात्।५५। गंधत्वाद्यव्यतिरेकाद्गंधादीनामप्रति ८
षेधः।५६। विषयत्वाव्यतिरेकादेकत्वं।५७। न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपंचत्वेभ्यः।५८।
भूतगुणविशेषोपलब्धेस्तादात्म्यं।५९। अथार्थपरीक्षाप्र०॥ ॥गंधरसरूपस्पर्शशब्दानां
स्पर्शपर्यंताः पृथिव्याः।६०। अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः।६१। न सर्वगुणानुप
लब्धेः।६२। एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः।६३। विष्टं ह्यपरं परेण।६४।
न पार्थिवाप्ययोः प्रत्यक्षत्वात्पूर्वपूर्वगुणोत्कर्षात्तत्प्रधानं।६५। तद्व्यवस्थानं तु भूयस्त्वात्॥६६॥

सगुणानामिंद्रियभावात्।६७। तेनैव तस्याग्रहणाच्च न स्वगुणोपलब्धिरिंद्रियाणां।६८। न शब्द
गुणोपलब्धेः।६९॥ तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्॥७०॥ ॥इति गौतमप्रणीतन्या
यसूत्रे तृतीयाध्याये प्रथममाह्निकं॥ प्रकरणानि ९॥ ॥अथ बुध्यनित्यताकरणंप्र० ॥ ॥
कर्माकाशसाधर्म्यात्संशयः।७१। विषयप्रत्यभिज्ञानात्।७२। साध्यसमत्वादहेतुः।७३। न युगपद्
ग्रहणात्।७४। अप्रत्यभिज्ञाने च विनाशप्रसंगः।७५। क्रमवृत्तित्वादयुगपद्ग्रहणं।७६। अप्रत्यभि
ज्ञानं च विषयांतरव्यासंगात्।७७। न गत्यभावात्।७८। स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभि
मानः।७९। न हेत्वभावात्।८०। अथौपोद्घातिकं क्षणभंगप्र०॥ ॥स्फटिकेप्यपरापरोत्पत्तेः।८१।
क्षणिकत्वाद्व्यक्तीनामहेतुः।८२। उपचयापचयप्रबंधादर्शनात्क्षीरादिषु।८३। नियमहेत्वभावा
द्यथादर्शनमभ्यनुज्ञा।८४। नोत्पत्तिविनाशकारणोपलब्धेः।८५। क्षीरविनाशकारणानुपलब्धि

वद्बुद्ध्युसंततिस्थत्वतदनुपपत्तिः ।८६। लिंगतो ग्रहणान्नानुपलब्धिः ।८७। न पयसः परिणामगुणांतरप्रादुर्भावात् ।८८। व्यूहांतरद्द्रव्यांतरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानं ।८९। क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकांतः ।९०। अथ तदात्मगुणत्वप्रकरणं ॥ ॥ नेंद्रियार्थयोस्तद्विनाशेपि ज्ञानावस्थानात् ।९१। युगपज्ज्ञेयानुपलब्धेश्च मनसः ।९२। तदात्मगुणत्वेपि तुल्यं ।९३। संनिकर्षाभावात्तदुत्पत्तिः ।९४। नोत्पत्तिकारणानपदेशात् ।९५। विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसंगः ।९६। अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यंतराद्विनाशः शब्दवत् ।९७। ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ।९८॥ नांतःशरीरवृत्तित्वान्मनसः ।९९। साध्यत्वादहेतुः ।१००। स्मरतः शरीरतः शरीरसाधारणोपपत्तेरप्रतिषेधः ।१। न तदाशुगतित्वान्मनसः ।२। न स्मरणकालानियमात् ।३। आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ।४। व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानं ।५॥

प्रणिधानलिंगादिज्ञानानामयुगपद्भावादयुगपत्स्मरणं ।६। ज्ञस्येच्छाद्वेषनिमित्तत्वादारंभनिवृत्त्योः ।७॥ तल्लिंगत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥८। परश्वादिष्वारंभनिवृत्तिदर्शनात् ।९। कुंभादिष्वनुपलब्धेरहेतुः ।१०। नियमानियमौ तु तद्विशेषकौ ।११। यथोक्तहेतुत्वात्पारतंत्र्यादकृताभ्यागमाच्च न मनसः ।१२। परिशेषाद्यथोक्तहेतूपपत्तेश्च ।१३॥ स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ।१४। प्रणिधाननिबंधाभ्यासलिंगलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबंधानंतर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ।१५॥ अथोत्पन्नापवर्गित्वप्र० ॥ ॥ अनित्यायां च बुद्धावुत्पन्नापवर्गित्वात्कालांतरावस्थानाच्चानित्यानां संशयः ।१६। कर्मानवस्थायिग्रहणात् ।१७। अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्संपाते रूपाव्यक्तग्रहणवत् ।१८। हेतूपादानात्प्रतिषेद्धव्याभ्यनुज्ञा ।१९॥ प्रदीपार्चिःसंतत्यभिव्यक्तग्रहणवत्तद्ग्रहणं ॥२०॥ अथ शरीरगुणव्यतिरेकप्र० ॥ ॥

गो०सूत्रं द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ।२१। यावद्द्रव्यभावित्वाद्रूपादीनां ।२२। न पाकजगुणांतरोत्प
त्तेः ।२३। प्रतिद्वंद्विसिद्धेः पाकजानामप्रतिषेधः ।२४। शरीरव्यापित्वात्तान केशनखादिष्वनुपलब्धेः ।२६।
अ त्वक्पर्यंतत्वाच्छरीरस्य केशनखादिष्वप्रसंगः ।शरीरगुणवैधर्म्यात् ।२७। न रूपादीनामितरेतरवैध
र्म्यात् ।२८। ऐंद्रियकत्वाद्रूपादीनामप्रतिषेधः ।२९। अथ मनःपरीक्षाप्रकरणं ॥ ॥ ज्ञानायौगपद्यादे १०
कं मनः ।३०। न युगपदनेकक्रियोपलब्धेः ।३१। अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् ॥३२॥
यथोक्तहेतुत्वाच्चाणु ।३३। अथ प्रासंगिकमदृष्टसाध्यत्वप्रकरणं ॥ ॥ पूर्वकृतफलानुबंधात्तदु
त्पत्तिः ।३४। भूतेभ्यो मूर्त्युपादानवत्तदुपादानं ।३५। न साध्यसमत्वात् ।३६। नोत्पत्तिनिमित्तत्वान्माता
पित्रोः ।३७। तथाहारस्य ।३८। प्राप्तौ चानियमात् ।३९। शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ॥४०॥
एतेनानियमः प्रत्युक्तः ।४१। उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ।४२। तददृष्टकारितमिति चेत् ॥४३॥

पुनस्तत्प्रसंगोऽपवर्गे ।४४। मनःकर्मनिमित्तत्वाच्च संयोगानुच्छेदः ।४५। नित्यत्वप्रसंगश्च प्रायणानुप
पत्तेः ।४६। अणुश्यामतानित्यत्ववदेतत्स्यात् ।४७। नाकृताभ्यागमप्रसंगात् ॥४८॥ प्रकरणानि ।७। ॥
इति श्रीगौतमसूत्रे तृतीयाध्यायः ॥ ॥ अथ प्रसंगसिद्धपरीक्षाकीर्तनप्रकरणं ॥ ॥ प्रवृत्तिर्य
थोक्ता ।१। तथा दोषाः ।२। अथ दोषत्रैराश्यप्र० ॥ ॥ तत्त्रैराश्यं रागद्वेषमोहार्थांतरभावात् ॥३॥ नै
कप्रत्यनीकभावात् ।४। व्यभिचारादहेतुः ।५। तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ।६। प्राप्तस्तर्हि
निमित्तनैमित्तिकभावादर्थांतरभावो दोषेभ्यः ।७। न दोषलक्षणावरोधान्मोहस्य ।८। निमित्तनै
मित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ।९। अथ प्रेत्यभावपरीक्षाप्र० ॥ ॥ आत्मनित्यत्वे प्रेत्य
भावसिद्धिः ।१०। व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥११॥ न घटाद्घटानिष्पत्तेः ।१२। व्यक्ताद्घटनिष्पत्ते
रप्रतिषेधः ।१३। अथ शून्योपादानताप्र० ॥ ॥ अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥१४॥

न्यायसूत्रं व्याघातादप्रयोगः॥१५॥ नातीतानागतयोः कारकशब्दप्रयोगात्॥१६॥ नविनष्टेभ्योनिष्पत्तेः॥१७॥ क्र
मनिर्देशादप्रतिषेधः॥१८॥ व्याहतव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहांतराद्द्रव्यनिष्पत्ति
र्नाभावात्॥१९॥ अथेश्वरोपादानताप्रकरणं॥ ॥ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्॥२०॥
न पुरुषकर्माभावे फलानिष्पत्तेः॥२१॥ तत्कारितत्वादहेतुः॥२२॥ अथाकस्मिकप्र०॥ ॥अनि ११
मित्ततोभावोत्पत्तिः कंटकतैक्ष्ण्यादिदर्शनात्॥२३॥ अनिमित्तनिमित्तत्वान्नानिमित्ततः॥२४॥ नि
मित्तानिमित्तयोरर्थांतरभावादप्रतिषेधः॥२५॥ अथसर्वानित्यताप्रकरणं॥ ॥सर्वमनित्यमु
त्पत्तिविनाशधर्मकत्वात्॥२६॥ नानित्यतानित्यत्वात्॥२७॥ तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविना
शवत्॥२८॥ नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात्॥२९॥ अथसर्वनित्यताप्रकरणं॥
सर्वं नित्यं पंचभूतनित्यत्वात्॥३०॥ नोत्पत्तिविनाशकारणोपलब्धेः॥३१॥ तल्लक्षणावरोधादप्रतिषेधः॥३२॥

नोत्पत्तिकारणोपलब्धेः॥३३॥ नव्यवस्थानुपपत्तेः॥३४॥ अथसर्वपृथक्त्वप्रकरणं॥ ॥सर्वं पृथग्भा
वलक्षणपृथक्त्वात्॥३५॥ नानेकलक्षणैरेकभावनिष्पत्तेः॥३६॥ लक्षणव्यवस्थानादेवाप्रतिषेधः॥३७॥
अथसर्वाभावप्र०॥ ॥सर्वमभावो भावेष्वितरेतराभावसिद्धेः॥३८॥ नस्वभावसिद्धेर्भावानां॥३९॥
नस्वभावसिद्धिरापेक्षिकत्वात्॥४०॥ व्याहतत्वादयुक्तं॥४१॥ अथसंख्यैकांतप्रकरणं॥ ॥संख्यै
कांतासिद्धिः कारणानुपपत्त्युपपत्तिभ्यां॥४२॥ नकारणावयवभावात्॥४३॥ निरवयवत्वादहेतुः॥४४॥
अथफलपरीक्षाप्र०॥ ॥सद्यः कालांतरे च फलनिष्पत्तेः संशयः॥४५॥ नसद्यः कालांतरोपभोग्य
त्वात्॥४६॥ कालांतरेणानिष्पत्तिर्हेतुविनाशात्॥४७॥ प्राङ्निष्पत्तेर्वृक्षफलवत्तत्स्यात्॥४८॥ नासन्नस
न्न सदसत्सतोर्वैधर्म्यात्॥४९॥ प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा॥५०॥ उत्पादव्ययदर्शनात्॥५१॥ ८
बुद्धिसिद्धं तु तदसत्॥५२॥ आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः॥५३॥ प्रीतेरात्माश्रयत्वादप्रतिषेधः॥५४॥

गौ० त्रं नपुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्॥५५॥तत्संबंधात्फलनिष्पत्तेस्तेषुफलवदुपचारः॥५६॥
अथदुःखपरीक्षाप्र०॥ ॥विविधबाधनायोगाद्दुःखमेवजन्मोत्पत्तिः॥५७॥सुखस्याप्यंतराल
निष्पत्तेः॥५८॥बाधनानिवृत्तेर्वेदयतःपर्येषणदोषादप्रतिषेधः॥५९॥दुःखविकल्पेसुखाभि
मानाच्च॥६०॥अथापवर्गपरीक्षाप्रकरणं॥ ॥ऋणक्लेशप्रवृत्त्यनुबंधादपवर्गाभावः॥६१॥
प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादोनिंदाप्रशंसोपपत्तेः॥६२॥समारोपणादात्मन्यप्रतिषेधः॥६३॥
पात्रचयांतानुपपत्तेश्चफलाभावः॥६४॥सुषुप्तस्यस्वप्नादर्शनेक्लेशाभावादपवर्गः॥६५॥नप्रवृ १२
त्तिःप्रतिसंधानायहीनक्लेशस्य॥६६॥नक्लेशसंततेःस्वाभाविकत्वात्॥६७॥प्रागुत्पत्तेरभावानि
त्यत्ववत्स्वाभाविकेप्यनित्यत्वं॥६८॥अणुश्यामतानित्यत्ववद्वा॥६९॥नसंकल्पनिमित्तत्वाच्चरा
गादीनां॥७०॥प्रकरणानि१४॥ ॥इतिगौतमप्रणीतन्यायसूत्रेचतुर्थाध्यायस्यप्रथममाह्निकं॥ ॥

अथतत्वज्ञानोत्पत्तिप्रकरणं॥दोषनिमित्तानांतत्वज्ञानादहंकारनिवृत्तिः॥१॥दोषनिमित्तंरूपा
दयोविषयाःसंकल्पकृताः॥२॥तन्निमित्तंत्ववयव्यभिमानः॥३॥अथप्रासंगिकमवयविप्र०॥ ॥
विद्याविद्याद्वैविध्यात्संशयः॥४॥तदसंशयःपूर्वहेतुप्रसिद्धत्वात्॥५॥वृत्त्यनुपपत्तेरपिकृत्स्नैक
देशावृत्तित्वादवयवानामवयव्यभावः॥६॥तेषुचावृत्तेरवयव्यभावः॥७॥पृथक्चावयवेभ्योवृत्तेः॥११॥
केशसमूहेतैमिरिकोपलब्धिवत्तदुपलब्धिः॥१२॥स्वविषयानतिक्रमेणेंद्रियस्यपटुमंदभावाद्वि
षयग्रहणस्यतथाभावोनाविषयेप्रवृत्तिः॥१३॥अवयवावयविप्रसंगश्चैवमाप्रलयात्॥१४॥नप्र
लयोणुसद्भावात्॥१५॥परंवात्रुटेः॥१६॥अथौपोद्घातिकंनिरवयत्वप्रकरणं॥ ॥आकाशव्यतिभेदा
त्तदनुपपत्तिः॥१७॥आकाशासर्वगतत्वंवा॥१८॥अंतर्बहिरितिकार्यद्रव्यस्यकारणांतरवचनादका
र्येतदभावः॥१९॥शब्दसंयोगविभावाच्चसर्वगतं॥२०॥अव्यूहाविष्टंभविभुत्वानिचाकाशधर्माः॥२१॥

गो॰ त्रं मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥२२॥ संयोगोपपत्तेश्च ॥२३॥ अनवस्थाकारित्वादनवस्थानु
पपत्तेश्चाप्रतिषेधः ॥२४॥ अथ प्रासंगिकं बाह्यार्थापह्नवनिराकरणप्रकरणं ॥ ॥बुद्ध्या विवेचनात्तु
भावानां याथात्म्यानुपलब्धिस्तंतपकर्षणे पटसद्भावानुपलब्धिवत्तदनुपलब्धिः ॥२५॥ व्याहतत्वा
दहेतुः ॥२६॥ तदाश्रयत्वादपृथग्ग्रहणंप्रमाणतश्चार्थप्रतिपत्तेः ॥२७॥ प्रमाणोपपत्त्यनुपपत्तिभ्यां ॥२८॥ १३
स्वप्नविषयाभिमानवदयं प्रमेयाभिमानः ॥२९॥ मायागंधर्वनगरमृगतृष्णिकावद्वा ॥३०॥ हेत्वभावाद
सिद्धिः ॥३१॥ स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः ॥३२॥ मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्स्वप्न
विषयाभिमानप्रणाशवत्प्रतिबोधे ॥३३॥ बुद्धेश्चैवं निमित्तसद्भावोपलंभात् ॥३४॥ तत्त्वप्रधानभे
दाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥३५॥ अथ तत्त्वज्ञानविवृद्धिप्रकरणं ॥ ॥समाधिविशेषाभ्या
सात् ॥३६॥ नार्थविशेषप्राबल्यात् ॥३७॥ क्षुदादिभिः प्रवर्त्तनाच्च ॥३८॥ पूर्वकृतफलानुबंधात्तदुत्पत्तिः ॥३९॥
त

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥४०॥ अपवर्गेप्येवं प्रसंगः ॥४१॥ निष्पन्नावश्यंभावात् ॥४२॥
तदभावश्चापवर्गे ॥४३॥ तस्मात्सर्वदुःखविमोक्षोपवर्गः ॥४४॥ तदर्थं यमनियमात्मसंस्काराद्योगा
च्चाध्यात्मविध्युपायैः ॥४५॥ ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥४६॥ तं शिष्यगुरुसब्रह्मचा
रिविशिष्टश्रेयोर्थिभिरनसूयिभिरभ्युपेयात् ॥४७॥ प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥४८॥ अ
थ तत्त्वज्ञानपरिपालनप्रकरणं ॥ ॥तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितंडे बीजप्ररोहसंरक्षणा
र्थं कंटकशाखावरणवत् ॥५०॥ ताभ्यां विगृह्य कथनं ॥५१॥ प्रकरणानि षट् ॥६॥ ॥इति श्रीगौत
मप्रणीते न्यायसूत्रे चतुर्थोध्यायः ॥ ॥अथ सत्प्रतिपक्षदेशनाभासप्रकरणं ॥ ॥साधर्म्यवैध
र्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्व
र्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥१॥ साधर्म्यवैधर्म्याभ्यामुपसंहारे
तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥२॥ गोत्वाद्गोसिद्धिवत्तत्सिद्धेः ॥३॥ अथ साध्यदृष्टांतधर्म

गौत०वं विकल्पोत्कर्षसमादिषट्प्र०॥ ॥साध्यदृष्टांतयोर्द्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्याव
र्ण्यविकल्पसाध्यसमाः॥४॥ किंचित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः॥५॥ साध्यातिदेशा
च्च दृष्टांतोपपत्तेः॥६॥ अथयुगलत्वाहितद्विकल्पोपक्रमजातिद्वयप्रकरणं॥ ॥प्राप्यसाध्यम
हे प्राप्य वा तोः प्राप्त्याविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ॥७॥ घटादिनिष्पत्तिदर्श
नात्पीडने चाभिचारादप्रतिषेधः॥८॥ अथव्यवस्थिताव्यवस्थितजातिद्वयप्रकरणं॥ ॥दृष्टां १४
तस्य कारणानपदेशात्प्रसंगस्य ना च प्रतिदृष्टांतेन प्रसंगप्रतिदृष्टांतसमौ॥९॥ प्रदीपोपादान
प्रसंगविनिवृत्तिवत्तद्विनिवृत्तिः॥१०॥ प्रतिदृष्टांतहेतुत्वे च नाहेतुर्दृष्टांतः॥११॥ अथानुत्पत्तिसमा
प्रकरणं॥ ॥प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः॥१२॥ तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारण
प्रतिषेधः॥१३॥ अथसंशयसमाप्रकरणं॥ ॥सामान्यदृष्टान्तयोरैंद्रियकत्वे समाने नित्यानित्यसाधर्म्या
त्संशयसमः॥१४॥ साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेत्यंतसंशयप्रसंगो निय

त्यानभ्युपगमाच्च सामान्यस्याप्रतिषेधः॥१५॥ अथप्रकरणसमाप्र०॥ ॥उभयसाधर्म्यात्प्र
क्रियासिद्धेः प्रकरणसमः॥१६॥ प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोप
पत्तेः॥१७॥ अथाहेतुसमाप्रकरणं॥ ॥त्रैकाल्यासिद्धेर्हेतोरहेतुसमः॥१८॥ न हेतुतः साध्य
सिद्धेस्त्रैकाल्यासिद्धिः॥१९॥ प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः॥२०॥ अथार्थापत्ति
समाप्रकरणं॥ ॥अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः॥२१॥ अनुक्तस्यार्थापत्तेः पक्ष
हानेरुपपत्तिरनुक्तत्वादनैकांतिकत्वाच्चार्थापत्तेः॥२२॥ अथहेतुसमाप्रकरणं॥ ॥एकधर्मो
पपत्तेरविशेषे सर्वाविशेषप्रसंगात्सद्भावोपपत्तेरविशेषसमः॥२३॥ क्वचित्तद्धर्मोपपत्तेः क्वचि
च्चानुपपत्तेः प्रतिषेधाभावः॥२४॥ अथोपपत्तिसमाप्रकरणं॥ [redacted]
[redacted] उभयकारणोपपत्तेरुपपत्तिसमः॥२५॥ उपपत्तिप्रकरणाभ्यनुज्ञानादप्रतिषेधः॥२६॥

गौत०सूं अथोपलब्धिसमाप्रकरणं॥ ॥निर्दिष्टकारणाभावेप्युपलंभादुपलब्धिसमः॥२७॥ कारणांत
रादपितद्धर्मोपपत्तेरप्रतिषेधः।२८॥ अथानुपलब्धिसमाप्रकरणं॥ ॥तदनुपलब्धेरनुपलं
भादभावसिद्धौतद्विपरीतोपपत्तेरनुपलब्धिसमः।२९॥ अनुपलंभात्मकत्वादनुपलब्धेरहेतुः॥३०॥
ज्ञानविकल्पानांभावाभावसंवेदनादध्यात्मं।३१॥ अथानित्यसमाप्र०॥ ॥साधर्म्यात्तुल्यधर्मो
पपत्तेःसर्वानित्यत्वप्रसंगादनित्यसमः।३२।साधर्म्यादसिद्धेःप्रतिषेधासिद्धिःप्रतिषेध्यसाध १५
र्म्यात्॥३३।दृष्टांतेचसाध्यसाधनभावेनप्रज्ञातस्यधर्मस्यहेतुत्वात्तस्यचोभयथाभावान्नावि
शेषः॥३४।अथनित्यसमाप्र०॥ ॥नित्यमनित्यभावादनित्येनित्यत्वोपपत्तेर्नित्यसमः॥३५॥प्रतिषे
ध्येनित्यमनित्यभावादनित्येनित्यत्वोपपत्तेःप्रतिषेधाभावः।३६॥अथकार्यसमाप्रकरणं॥ ॥
उत्पत्त्यस्यविरोधाभावःशब्दस्यानित्यत्वंतत्रापरिप्रश्नात्तुपपत्तिः॥३७॥प्रयत्नकार्यानेकत्वात्कार्यसमः॥३८॥

कार्यान्यत्वेप्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः।३९॥अथषट्पक्षीकथाभासप्र०॥ ॥
प्रतिषेधेपिसमानोदोषः।४०॥सर्वत्रैवंप्रतिषेधविप्रतिषेधेदोषवद्दोषः।४१॥प्रतिषेधंसदो
षमभ्युपेत्यप्रतिषेधविप्रतिषेधेपिसमानोदोषप्रसंगोमतानुज्ञा॥४२॥स्वपक्षलक्षणापेक्षोप
पत्त्युपसंहारेहेतुनिर्देशेपरपक्षदोषाभ्युपगमात्समानोदोषः॥४३॥ ॥इतिगौतमप्रणीत
न्यायसूत्रेपंचमाध्यायस्याद्यमाह्निकं॥ ॥अथप्रतिज्ञोपलक्षितोक्तमात्राश्रयनिग्रहस्थान
लक्षणप्र०॥ ॥प्रतिज्ञाहानिःप्रतिज्ञांतरंप्रतिज्ञाविरोधःप्रतिज्ञासंन्यासोहेत्वंतरमर्थांतरं
निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालंन्यूनमधिकंपुनरुक्तमननुभाषणमज्ञानमप्रति
भाविक्षेपोमतानुज्ञापर्यनुयोज्योपेक्षणंनिरनुयोज्यानुयोगोऽपसिद्धांतोहेत्वाभासाश्चनिग्र
हस्थानानि॥४४॥प्रतिदृष्टांतधर्म्याभ्यनुज्ञास्वदृष्टांतेप्रतिज्ञाहानिः॥४५॥प्रतिज्ञातार्थप्रतिषेधे

गौतमन्यायसूत्रं र्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञांतरं ॥४६॥ प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥४७॥ पक्ष
प्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥४८॥ अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमि
च्छतो हेत्वंतरं ॥४९॥ अथ कृतोपयोगि वाक्यार्थप्रतिपत्तिशून्य निग्रहस्थानप्रक० ॥ ॥प्रकृतादर्था
दप्रतिसंबद्धार्थमर्थांतरं ॥५०॥ वर्णक्रमनिर्देशवन्निरर्थकं ॥५१॥ परिषत्प्रतिवादिभ्यां त्रिरभि
हितमप्यविज्ञातमविज्ञातार्थं ॥५२॥ पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकं ॥५३॥ अथ स्तुनिरसि १९
द्धांतानुरूपप्रयोगाभासनिग्रहस्थानत्रिप्रकरणं ॥ ॥अवयवविपर्यासवचनमप्राप्तकालं ॥५४॥
हीनमन्यतमेनाप्यवयवेन न्यूनं ॥५५॥ हेतूदाहरणाधिकमधिकं ॥५६॥ अथ पुनरुक्तिनिग्रहस्था धिक
नप्र० ॥ ॥शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥५७॥ अर्थादापन्नस्य स्वशब्देन पुनर्व
र्वचनं ॥५८॥ अथोत्तरविरोधिनिग्रहस्थानप्र० ॥ ॥विज्ञातस्य परिषदा त्रिरभिहितस्याप्रत्युच्चा

रणमननुभाषणं ॥५९॥ अविज्ञातं चाज्ञानं ॥६०॥ उत्तरस्याप्रतिपत्तिरप्रतिभा ॥६१॥ कार्यव्यासं
खे गात्कथाविच्छेदो विक्षेपः ॥६२॥ अथ दोषनिरूप्यमतानुज्ञादित्रिप्र० ॥ ॥स्वपक्षे दोषाभ्युपग
मात्परपक्षे दोषप्रसंगो मतानुज्ञा ॥६३॥ निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणं ॥६४॥
भि अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥६५॥ अथ कथकान्योक्तनिरूप्यनिग्र
हस्थानद्वयप्र० ॥ ॥सिद्धांतमभ्युपेत्यानियमात्कथाप्रसंगोऽपसिद्धांतः ॥६६॥ हेत्वाभासाश्च यथोक्ताः ॥६७॥
प्रकरणानि ७ ॥ ॥इति श्रीगौतमप्रणीते न्यायसूत्रे पंचमोऽध्यायः ॥ ॥न्यायदर्शनं समाप्तं ॥ ॥
प्रकरणानि चतुरशीतिः ८४ सूत्राणि त्रयोविंशत्यधिकपंचशतं ५२३ ॥ ॥वार्त्तिकोक्तसंक्षेपकारिकाः
तत्र प्रथमे [illegible] तं च प्रतिज्ञासंसारस्तन्निवृत्तिश्च सविग्रहा उद्देशोलक्षणं चैव तत्त्वानामिह कीर्तितं ॥१॥
द्वितीये ॥ ॥संशयस्य परीक्षा माणानां विचारस्तथैव स्थितिः ॥ शब्दस्य तत्त्वं प्रमाणेयपदार्थश्चेह कीर्तितं ॥२॥

न्यायसूत्रं ॥ तृतीये आत्माशरीरं प्रकरणम थो वुद्धिर्मनस्तथा ॥ यद्यथावस्तुतस्तेन तत्तथैवोपवर्णितं ॥३॥ चतु
र्थे प्रवृत्तिदोषस्तंधः प्रेत्यभावः अथ चेतः ॥ फलं दुःखं विमुक्तिश्च [illegible] पायश्च कीर्तितः ॥४॥ पंच
मे जातीनां सप्रपंचानां प्रतिग्रहस्थानलक्षणं ॥ शास्त्रस्यैवोपसंहारः पंचमे परिकीर्तितः ॥५॥